नुपूर्व्वशः। लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम्। भयाद्द्वौ मध्यमं दण्ड्यो मैत्रात् पूर्वं चतुर्गुणम्। कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्। अज्ञानाद् द्वे शते पूर्णे बालिश्याच्छतमेव तु। एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिभिः। धर्म्मस्याव्यभिचारार्थमधर्म्म-नियमाय च। कौटसाक्ष्यन्तु कुर्वाणांस्त्रीन् वर्णान् धार्मिको नृपः। प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत्"।

**कौटि** पुंस्त्री कूटस्यापत्यम् इञ्। कूटस्य मिथ्याशंसिनोऽपत्ये स्त्रियां तु क्रौड्यादि॰ ष्यङ्। कौट्या

**कौटिक** त्रि॰ कूटेन मृगबन्धनयन्त्रेण चरति ठक्। मांस-विक्रयोपजीविनि अमरः। कूट+चतुरर्थ्यां कुमु॰ ठक्। कूटसन्निकृष्टदेशादौ त्रि॰।

**कौटिलिक** त्रि॰ कुटिलिका व्याधानां गतिभेदः कर्म्मारोपकरणभूतं लौहञ्च तया हरति मृगान् अङ्गारान् वा। "अण् कुटिलिकायाः" पा॰ अण्। १व्याधे २कर्म्मकारे च सि॰ कौ॰।

**कौटिल्य** न॰ कुटिलस्य भावः ष्यञ्। १वक्रीभावे "नित्यं कौटिल्ये गतौ" पा॰। "कौटिल्यं कचनिचये करचरणाधरनेषु रागस्ते" का॰प्र॰ तच्चोपपातकम् "कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम्" या॰ स्मृतेः। उपपातकशब्दे विवृतिः। स्वार्थे ष्यञ्। २चाणक्यमुनौ पु॰ राजनि॰ "आकर्ण्य आत्मानम्। कौटिल्यः—कुटिलमतिः स एष येन क्रोधाग्नौ प्रसभमदाहि नन्दवंशः" मुद्राराक्षसम्

**कौटीगव्य** पुंस्त्री कुटीगोर्ऋषिभेदस्य गोत्रापत्यम् गर्गा॰ यञ्। कुटीगोर्ऋषेर्गोत्रापत्ये। तस्य छात्रः कण्वा॰ अण् यलोपः। कौटीगव, तच्छात्रे। [देशादौ

**कौटीय** त्रि॰ कूट+चतुरर्थ्यां कृशाश्वा॰ छण्। कूटसन्निकृष्ट-

**कौटीर्य्य** त्रि॰ कुटीरः केवल एव स्वार्थे ष्यञ्। केवले असहाये। कौटिरीर्य्या यस्याः। २दुर्गायाम् स्त्री "कौटीर्य्यां मदिरां चण्डामिलां मलयवासिनीम्" हरिवं॰ १७८अ॰

**कौटुम्ब** त्रि॰ कुटुम्बं तद्भरणं प्रयोजनमस्य अण्। कुटुम्बभरणोपयोगिद्रव्ये। आहरेदित्यनुवृत्तौ "अन्यथा कौटुम्बम्" आश्व॰ गृ॰ सू॰ २,६,१०,

**कौटुम्बिक** त्रि॰ कुटुम्बे तद्भरणे प्रसृतः ठक्। कुटुम्बभरणे व्यापृते "कौटुम्बिकः क्रुध्यति वै जनाय" भाग॰ ५,५,१२,६,। कुटुम्बे भवः ठक्। २कुटुम्बमध्यपातिनि। "यत्र कौटुम्बिका दारापत्यादयोनाम्ना, कर्म्मणा वृकसृगाला एव" भाग॰ ५,१४,५,

**कौट्या** स्त्री कूटस्यापत्यम् इञ् स्त्री कौटिः सैव क्रौड्या ष्यङ्। १कूटापत्यस्त्रियाम् कूट+चतुरर्थ्याम्। संकाशा॰ ण्य। २कौट्य कूटसन्निकृष्टदेशादौ त्रि॰

**कौठारिकेय** त्रि॰ स्वल्पा कुठारी कुठारिका तस्याः इदम् शुभ्रा॰ ढक्। स्वल्पकुठारसम्बन्धिनि

**कौडविक** त्रि॰ कुडवस्य वापः ठञ्। कुडववापयोग्ये क्षेत्रादौ कुडवं तत्परिमितमन्नं सम्भवति पचति अवहरति वा ठञ्। २स्वस्मिन् कुडवमितान्नसमावेशके कटाहादौ ३तत्पाचके सूदादौ ४तद्व्यहारके च स्त्रियां ङीप्। कुडवः परिमाणमस्य ठञ्। ५कुडवपरिमिते। संख्यापूर्व्वकत्वे पूर्व्वपदस्य न वृद्धिः द्विकौडविकः। अर्द्धपूर्व्वकस्य तु वा वृद्धिः आ(अ)र्द्धकौडविकः। असंज्ञायान्तु ठञोलुक्। द्विकुडवम् अर्द्धकुडवम् इत्यादि।

**कौड्येयक** त्रि॰ कुड्ड—काक्रर्ष्ये ण्यत् संयोगादिलोपः कुड्या तत्र जातादि कत्र्या॰ ढकञ् "कुड्याया यलोपश्च" पा॰ ग॰यलोपः। कार्कर्य्यकरणार्हायां भूमौ जातादौ

**कौणकुत्स्य** पु॰ ऋषिभेदे। "भरद्वाजः कौणकुत्स्य आर्ष्टिषेणोऽथ गौतमः" भा॰ आ॰ ८अ॰।

**कौणप** पु॰ कुणपः शवः भक्ष्यत्वेन विद्यतेऽस्य,अण् कुणपस्तद्भक्षणं शीलमस्य ण वा। राक्षसे अमरः "न कौणपाः श्रृङ्गिणो वा न देवा नच भा॰आ॰१७०अ॰मानुषाः" स्त्रियां ङीप्

**कौणपदन्त** पु॰ कौणपस्य दन्ताइव दन्ता अस्य। भीष्मे त्रिका॰

**कौणपाशन** पु॰ कौणपानामशनमिवाशनमस्य। सर्पभेदे "हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः" भा॰ आ॰ ३५अ॰ नागनामोक्तौ

**कौण्डपायिन्** पु॰ ब॰व॰ कुण्डमेव कौण्डं तेन पिबन्ति सोमं पा—णिनि। सोमयागकारियजमानभेदेषु।

**कौण्डपायिन** न॰ कुण्डपायिनामिदम् अण् नि॰ प्रकृतिभावः। कुण्डपायिनां (कुण्डेन सोमपायिनाम्)सम्बन्धिनि अयनरूपे सत्रभेदे कुण्डपायिनामयनशब्दे विवृतिः।

**कौण्डल** त्रि॰ कुण्डलमस्त्यस्य ज्योत्स्ना॰ अण्। कुण्डलयुक्ते त्रि॰ स्त्रियां ङीप्। [सन्निकृष्टदेशादौ

**कौण्डलिक** त्रि॰ कुण्डल+चतुरर्थ्यां कुमु॰ ठक्। कुण्डल

**कौण्डाग्निक** त्रि॰ कुण्डस्येदम् कौण्डं अग्नौ भवः वृद्धाद्यन्य्युत्तरपदत्वात् वुञ्। कुण्डसम्बन्धिवह्निभवे

**कौण्डायन** त्रि॰ कुण्डस्यादूरदेशादि पक्षा॰ चतुरर्थ्यां फक्। कुण्डसन्निकृष्टादेशादौ [कुण्डिननगरजातादौ

**कौण्डिनेयक** त्रि॰ कुण्डिने जातादि कत्र्या॰ ढकञ्।